दिनाङ्क :- 28.06.2025

प्रात: - 06:55

## अथ वार्ताः

### प्रधानमन्त्री आचार्य

अद्य नवदेहल्यां प्रधानमन्त्री नरेन्द्र मोदी आचार्य विद्यानन्द जी महाराज्ञ: शतवर्षपूर्ति-उत्सवस्य उद्घानं विधास्यति। अत्रावसरे असौ जनसभां च संबोधयिष्यति। अयम् कार्यक्रमः आचार्य विद्यानन्द जी महाराज्ञ: शततम-जन्मदिनम् आचरितुं वर्तते। सर्वकारः भगवन महावीर अहिंसा भारती इति न्यासेन सह संयुक्त तत्वावधानेन आयोज्यमानस्य राष्ट्रिय-श्रद्धाञ्जलि-कार्यक्रमस्य औपचारिक-आरम्भं करोति। आचार्य विद्यानन्द: एकः श्रद्धेयः जैन-आध्यात्मिक-नेता सामाजिक-कार्यकर्ता च आसीत्। वर्ष-दीर्घे उत्सवे तस्य जीवनं ज्ञातुं, तस्य सन्देशं प्रसारयितुं च देशे सांस्कृतिक-साहित्यिक-शैक्षणिक-आध्यात्मिक-प्रयत्नाः भविष्यन्ति। आचार्य विद्यानन्द जी महाराजः जैन-दर्शनस्य विषये पञ्चाशत् अधिकान् ग्रन्थान् अलिखत्।

### राष्ट्रपतिः सूक्ष्म-लघु-मध्यम उद्यमाः

राष्ट्रपतिः पदासीना द्रौपदी मुर्मू: अवोचत् यत् सूक्ष्म-लघु-मध्यम उद्यमाः भारतीय-वैश्विक-अर्थव्यवस्थायाः आधारो वर्तते। उद्यमशीलतायाः पोषणं, वृत्यवसरस्य सृजनं, सर्वसमावेशकविकासस्य प्रोत्साहनं च कृत्वा, एम्. एस्. एम्. ई. इत्येते मूलस्तरे आर्थिकपरिवर्तनम् अनुवर्तयन्ति। ह्यः नव-दिल्ली-नगरे अन्ताराष्ट्रिय-एम्. एस्. एम्. ई. दिवस-कार्यक्रमम् संबोधयन्ती राष्ट्रपतिः अवदत् यत् देशस्य प्रगतिषु एम्. एस्. एम्. ई. क्षेत्रम् महत्त्वपूर्णां भूमिकां निर्वहति इति।

राष्ट्रपतिः मुर्मूः अवदत् यत् एम्. एस्. एम्. ई. क्षेत्रम् न केवलं देशस्य जी. डी. पी. वर्धयति अपितु नवान्वेषणम् अपि प्रवर्धयति।

## जगन्नाथ- रथयात्रा

ओडिशा राज्यस्य पुरी-नगर्यां भगवतः जगन्नाथस्य विश्व-प्रसिद्धः वार्षिकी रथयात्रा ह्यः आरब्धः। मन्यते यत् जून जुलाई मासयोः संजायमाणे प्रसिद्धे उत्सवे भगवान जगन्नाथः तस्य अग्रजः बलभद्रः, कनिष्ठा भगिनी च देव्याः सुभद्रायाः विग्रह-रथेषु आरूह्य दर्शनं प्रददति। मन्दिरप्रशासनस्यानुसारं अस्मिन् वर्षे उत्सवे प्रायः त्रयोदशलक्षमिताः भक्ताः भागं गृह्णन्ति । राष्ट्रपतिः सर्वेभ्यः जगन्नाथ रथयात्रायाः शुभकामनाः अयच्छत्।

## अमितशाहः गुजरात यात्रा

केन्द्रीयगृहमन्त्री अमितशाहः ह्यः गान्धीनगरे सूचना केन्द्रं ग्रन्थालय केन्द्रम् च अगच्छत्। स्वस्य यात्रावधौ सः पुस्तकालयानां विकासस्य समीक्षाम् अकरोत्। एकस्मिन् जन संचार पटले श्री शाहः अवदत् यत् केन्द्रम् अत्याधुनिक-तन्त्रज्ञानेन सह एकीकृतं कृत्वा पुस्तकालयानां निरन्तरं वर्धनं कुर्वत् अस्ति इति। श्री शाहः सस्तु-साहित्य-वर्धक्-कार्यालय-मोबैल्- एप इत्यस्यापि उद्घाटनं विहितवान्, यत् पुस्तकप्रेमिणां कृते अत्यन्तं लाभप्रदं भविष्यति इति अपेक्ष्यते।

## हाकी-इण्डिया-मास्टर्स्-कप्

चेन्नै-नगरे प्रथम-हाकी-इण्डिया-मास्टर्स्-कप्-क्रीडायां महिलावर्गे चरमस्पर्धायां ओडिशा-राज्येन पञ्जाब्-राज्यम् पराजितम्। पुरुषवर्गे तमिळुनाडु-राज्यस्य सामुख्यं महाराष्ट्र-राज्येन सह शीघ्रमेव भविष्यति।

## संस्कृत-साप्ताहिकी

प्रियाः श्रोतारः, संस्कृत-जगता सम्बद्धैः विभिन्नैः क्रिया-कलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ्.एम्.गोल्ड्-प्रवाहिकातः श्वः मध्याह्ने सार्धैक-वादनतः भविष्यति। भवन्तः सर्वे यथाकालं श्रोतुं प्रभवन्ति।